# ॥ समिदाधानम्॥ Daily ritual for ब्रह्मचारीन्स्

(face East and have Homa कुण्ड and offerings like समिधास् ready / this should be twigs of twigs of )

॥ गणपति ध्यानम्॥ Meditation on Lord Ganapati (Tap the temples then do Namaskaara-mudra)

शुक्लाम्-बरधरं विष्णुं शशि-वर्णं चतुर्भुजम्।

प्रसन्-नवदनं ध्यायेत् सर्वविघ्नो-पशान्तये॥

॥ आचमनियम्॥ (sip water three times)

ॐ ब्रह्मणे स्वाहा।

ॐ विष्णवे स्वाहा।

ॐ रुद्राय स्वाहा॥

॥ प्राणायामः॥

ॐ अस्य प्राणावस्य। (namaskara mudra)

पर-ब्रह्म ऋषिः। (touch forehead)

दैवि-गायत्री छन्दः। (touch top lip)

परम्-आत्मा देवता। (touch heart)

प्राणा-यामे विनि-योगः॥ (namaskara mudra)

ॐ ॐ ॐ।
(breath in through the left nostril)
ॐ बूः। ॐ भुवः। ॐ सुवः। ॐ महः। ॐ जनः। ॐ तपः। ॐ सत्यं॥
(retain the breath)
ॐ तत् सवितुर् वरेण्यं भर्गो देवस्य धीमहि। धीयो योनः प्रचोदयात्॥
(breath out through right nostril)
ॐ आपो ज्योति-रसोमृतं ब्रह्मा भूर् भुवः सुवराप ॐ॥
(repeat this starting with the right nostril instead of the left)

॥ सङ्कल्पः॥ Statement of intent to perform the ritual (Take three pinches of rice akshatas in the right hand and cover with the left hand. Hold this while chanting the sankalpa, and offer into the homa कुण्ड with "करिष्ये")

ॐ ममो-पात्त। समस्त दुरित-क्शय-द्वार। श्री परमेश्वर प्रीत्यर्थं। प्रातः समिदा-धानं करिष्ये। (or if it is evening सायं समिदा-धानं करिष्ये)

अप उपस्प्रिष्य॥ (Take a spoon of water and wash hands for purification.)

(light fire if not already lit with the mantra ॐ भूर् भुव स्सुवरों)

॥ प्रार्थनाम्॥ (नमस्कार मुद्रा)

परि त्वाऽग्ने परि मृजाम्यायुषा च धनेन च।

सुप्रजाः प्रजया भूयासगं सुवीरो विरै स्सुवर्चा वर्चसा सुपोषः पोषै-स्सुगृहो गृहै-स्सुपतिः पत्या सुमेधा मेधया सुब्रह्मा ब्रह्मचारिभिः।

अदि॒तेऽनु॑मन्यस्व।

अनु॑म॒तेऽनु॑मन्यस्व।

सर॑स्व॒तेऽनु॑मन्यस्व।

देव॑ सवि॒तः प्रसु॑व॥

॥ द्वादश समि॑धाहु॑ति॥ (Offering of twelve samidhaas)

अ॒ग्नये॑ समि॒ध-माहा॑र्षं बृह॒ते जा॒तवे॑दसे। यथा॒ त्वम॑ग्ने स॒मिधा॑ समि॒ध्यस॑ ए॒वं मा॒मायु॑षा॒ वर्च᳚सा स॒न्या मे॒धया प्र॒जया॑ प॒शुभि॑र्-ब्रह्मवर्च॒सेना॒-न्नाद्ये॑न॒ समे॑धय॒ स्वाहा।

(offer समि॑धा or दर्भा॑)

एधोऽस्येधिषी॒-महि॒ स्वाहा। (offer समि॑धा)

स॒मिद॑सि समेधिषी॒महि॒ स्वाहा। (offer समि॑धा)

तेजो॑ऽसि॒ तेजो॒ मयि॑ धेहि॒ स्वाहा। (offer समि॑धा)

अपो॑ अ॒द्यान्व॑-चारि॒ष॒गं॒ रसे॑न॒ सम॑-सृक्षमहि। पय॑स्वाग्ं अग्न॒ आग॑मं॒ तं मा॒ सग्ं॑सृ॒ज॒ वर्च᳚सा॒ स्वाहा। (offer समि॑धा)

सं माऽग्ने॒ वर्च᳚सा सृज प्र॒जया॑ च॒ धने॑न च॒ स्वाहा। (offer समि॑धा)

वि॒द्युन्मे॑ अस्य दे॒वा इन्द्रो॑ विद्याथ्स॒ह ऋषि॑भि॒ स्स्वाहा।  (offer समि॑धा)

अ॒ग्नये॑ बृह॒ते नाका॑य॒ स्वाहा। (offer समि॑धा)

द्यावा॑-पृथि॒वीभ्या॒ग्ग॒ स्वाहा।  (offer समि॑धा)

ए॒षा ते॑ अग्ने स॒मित्तया॒ वर्ध᳚स्व॒ चाप्या॑यस्व च॒ तया॒ऽहं वर्ध᳚मानो भूयासमा॒-प्याय॑-मानश्च॒ स्वाहा। (offer समि॑धा)

यो माऽग्ने भा॒गिनग्ं॑ स॒न्तमथा॑-भा॒गं चिकी᳚र्षति।

अभा॒-गम॑ग्ने॒ तं कु॑रु॒ माम॑ग्ने भा॒गिनं॑ कुरु॒ स्वाहा। (offer समि॑धा)

स॒मिध॑मा॒-धायाग्ने॒ सर्व᳚व्रतो भूया॒सग्ग॒ स्वाहा। (offer समि॑धा)

ॐ भू स्स्वाहा। अग्नये इदं॑ न म॒म।

ॐ भुव॒ स्स्वाहा। वायवे इदं॑ न म॒म।

ॐ सुव॒ स्स्वाहा। सूर्या॑य इदं॑ न म॒म।

ॐ भूर्॒ भुव॒ स्सुव॒ स्स्वाहा। प्रजापतये इदं॑ न म॒म॥

अदि॒तेऽ॑ं॑वमग्ग्स्थाः।

अनु॑म॒तेऽन्व॑मग्ग्स्थाः।

सर॑स्व॒तेऽन्व॑मग्ग्स्थाः।

देव॑ सवि॒तः प्रासा॑वीः।

॥ अग्नि उपस्थानम् करि॑ष्ये। (नमस्कार मुद्राम्)

यत्ते॑ अग्ने तेज॒स्तेन॑ अ॒हं ते॒ज॒स्वी भू॑यासम्।

यत्ते॑ अग्ने वर्च॒स्तेन॑ अ॒हं व॒र्च॒स्वी भू॑यासम्।

यत्ते॑ अग्ने ह॒रस्तेन॑ अ॒हं ह॒रस्वी भू॑यासम्।

मयि॑ मे॒धां मयि॑ प्र॒जां मय्य॒ग्निस्-तेजो॑ दधातु।
मयि॑ मे॒धां मयि॑ प्र॒जां मयीन्द्र॑ इन्द्रि॒यं द॑धातु।
मयि॑ मे॒धां मयि॑ प्र॒जां मयि॒ सूर्यो॒ भ्राजो॑ दधातु।

ॐ अग्नये नमः॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन।
यद्धुतं तु मया देव परिपूर्णं तदस्तु ते॥
प्रायश्चित्तान्-यशेषाणि तपः कर्मात्-मकानि वै।
यानि तेषा-मशेषाणां श्री शिव-स्मरणं परम्॥
हर हर पार्वति पतये।
हर हर महा-देव॥

॥ अभिवादम्॥ (Do अभिवादम् according to your tradition or skip this step)
अभिवाधये काश्यपा आवत्सार नैध्रुवा त्र्या ह्षेया प्रवरान्

॥ रक्षम्॥ (Take ash from the fire, hold in the left hand, and pray for blessings with these mantras as you mix the ash to a fine powder moving the ring finger of the right hand in a clockwise circle through the ash.)
मान॑स्तो॒के तन॑ये॒ मा न॒ आयु॑षि॒ मा नो॒ गोषु॒ मा नो॒ अश्वे॑षु रीरिषः।
वी॒रान्मा नो॑ रुद्र भामि॒तोऽव॑धी-र्ह॒विष्म॑न्तो॒ नम॑सा विधेम ते॥
आ॒रात्ते॑ गो॒घ्न उ॒त पू॑रुष॒घ्ने क्ष॒य-द्वी॑राय सु॒म्नम॒स्मे ते॑ अस्तु।
रक्षा॑ च नो॒ अधि॑ च देव ब्रू॒ह्यधा॑ च नः॒ शर्म॑ यच्छ द्वि॒बर्हाः॑॥
(Then take ash with the right hand ring finger and apply to the parts mentioned)
मे॒धा॒वी भूयासम्। (forehead)
ते॒ज॒स्वी भूयासम्। (heart)
व॒र्च॒स्वी भूयासम्। (right shoulder)
ब्र॒ह्म-व॒र्च॒स्वी भूयासम्। (left shoulder)
आ॒यु॒ष्मान् भूयासम्। (neck)
अ॒न्ना॒दो भूयासम्। (back of neck)
स्वस्ति॑ भूयासं॥ (crown of head)

॥प्रार्थनाम्॥ (namaskaara mudraam)
श्रद्धां मेधां यश प्रज्ञां विद्यां बुद्धिं श्रीयं बलम्।
आयुष्यं तेज आरोग्यं देहि मे हव्य-वाहना॥
देहि मे हव्य-वाहना ओं नमः इति॥

कायेन वाचा मनसेन्-द्रियैर्वा बुध्याऽऽ।त्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै नारायणायेति  समर्पयामि॥

ओम् तत् स॒त् . ब्रह्मार्पणम॒स्तु॥